# अभ्यासप्रश्नपत्रम् (2025-26)
# विषय : संस्कृतम्

**कक्षा : दशमी** **कोड न. 049**

रोल नं० | | | | | | | | | | |

समयः - 3 होराः ] [ पूर्णाङ्काः : 80

---

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 10 तथा प्रश्न 16 हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गये कोड नम्बर तथा सेट को छात्र उत्तर पुस्तिका के मुख्य पृष्ठ पर लिखें।
- कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमाङ्क अवश्य लिखें।
- उत्तर-पुस्तिका के बीच में खाली पन्ना / पन्नें न छोड़ें।
- उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।
- परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।
- कृपया प्रश्नों के उत्तर देनें से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।**

---

- **सामान्यनिर्देशाः :-**

(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।
(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iii) श्रेष्ठाङ्कान् प्राप्तये सुस्पष्टः लेखः लेखनीयः।

- **अस्मिन् प्रश्नपत्रे पञ्च खण्डाः सन्ति –**

| | | |
|---|---|---|
| खण्डः 'क' | अपठित-अवबोधनम् | - 10 अङ्काः |
| खण्डः 'ख' | रचनात्मक-कार्यम् | - 08 अङ्काः |
| खण्डः 'ग' | पठित-अवबोधनम् | - 24 अङ्काः |
| खण्डः 'घ' | अनुप्रयुक्त-व्याकरणम् | - 21 अङ्काः |
| खण्डः 'ङ' | पाठाधारिताः बहुविकल्पीयाः प्रश्नाः | - 17 अङ्काः |

# खण्डः 'क'

# अपठित-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि यथानिर्देशं संस्कृतेन लिखत - 10

अस्माकं जन्मभूमिः भारतवर्षमस्ति। देशोऽयमतिरमणीयः वर्तते। देवाः अप्यस्य दर्शनोत्सुकाः भवन्ति। अस्य भूमिः विविधानि फलानि अन्नानि च उत्पादयति। भारतस्योत्तरस्यां दिशि नगाधिराजो हिमालयः शोभते। दक्षिणस्यां च दिशि सागरः पादक्षालनं करोति । षड्ऋतवोऽत्र क्रमशः आगच्छन्ति। अत्र अनेकाः भाषाः, विविधाः सम्प्रदायाः, विभिन्नाः जातयश्च सन्ति, पुनरपि अनेकतायामप्येकता सर्वत्र दृश्यते।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2×1=2

(i) भारतस्योत्तरस्यां दिशि कः शोभते ?
(ii) कति ऋतवः अत्र क्रमशः आगच्छन्ति ?
(iii) देशोऽयं कीदृशः वर्तते ?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2×2=4

(i) दक्षिणस्यां दिशि कः पादक्षालनं करोति ?
(ii) भारतभूमिः कानि उत्पादयति ?
(iii) भारते अनेकतायाम् अपि का सर्वत्र दृश्यते ?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत । 1

(द) यथानिर्देशम् उत्तरत- ( केवलं प्रश्नत्रयम् ) 3×1=3

(i) 'अनुत्सुकाः' इत्यस्य पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?
(क) अनुत्सुक (ख) भवन्ति
(ग) उत्सुकाः (घ) देवाः

(ii) 'अस्माकं जन्मभूमिः भारतवर्षम् अस्ति' अत्र किं क्रियापदम् ?
(क) भारतवर्षम् (ख) अस्ति
(ग) जन्मभूमिः (घ) अस्माकम्

(iii) 'अनेकाः' इति विशेषणपदस्य विशेष्यपदं किम् ?
(क) भाषाः (ख) अनेकाः
(ग) अत्र (घ) विविधाः

(iv) 'देवाः अप्यस्य दर्शनोत्सुकाः भवन्ति।' अस्मिन् वाक्ये 'भवन्ति' क्रियायाः कर्तृपदं किं प्रयुक्तम् ?
(क) अस्य (ख) अपि
(ग) उत्सुकाः (घ) देवाः

# खण्डः 'ख'

# रचनात्मक-कार्यम्

2. (क) भवतः नाम महेशः। विद्यालयस्य प्रतियोगितासु भवता अनेकानि पदकानि जितानि। माधवं प्रति लिखित पत्रे मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा उत्तरपुस्तिकायां लिखत। 4

परीक्षाभवनम्
तिथिः

प्रिय मित्र माधव,


(i) ............... नमस्ते। अत्र कुशलं (ii) ............ । मया अनेकासु (iii) ..................... भागः गृहीतः। 100 मीटर धावनप्रतियोगितायां मया (iv) ................... प्राप्तम्। 400 मीटर धावनप्रतियोगितायां च रजतपदकम्। पितृभ्यां मम प्रणामाः।

तव मित्रम्,
महेशः

**मञ्जूषा**

| प्रतियोगितासु, सप्रेम, स्वर्णपदकम्, तत्रास्तु |
|---|

2. (ख) निर्दिष्टचित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दैः उचितरिक्तस्थानानि पूरयित्वा लिखत - 4



(i) इदं चित्रम् ................. अस्ति।

(ii) महिला ................ धारयति।

(iii) एका छात्रा ............ क्रीडति।

(iv) अत्र ................. अपि सन्ति।

**मञ्जूषा**

| रज्ज्वा, वृक्षाः, उद्यानस्य, शाटिकाम् |
|---|

## खण्डः 'ग'

## पठित-अवबोधनम्

3. निम्नलिखितं गद्यांशं पठित्वा हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

"बहून्यपत्यानि मे सन्तीति सत्यम्। तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बलः। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव" इति।

**अथवा**

बकः – अरे! अरे! मां विहाय कथमन्यः कोऽपि राजा भवितुमर्हति। अहं तु शीतले जले बहुकालपर्यन्तम् अविचलः ध्यानमग्नः स्थितप्रज्ञः इव स्थित्वा सर्वेषां रक्षायाः उपायान् चिन्तयिष्यामि, योजनां निर्मीय च स्वसभायां विविधपदमलंकुर्वाणैः जन्तुभिश्च मिलित्वा रक्षोपायान् क्रियान्वितान् कारयिष्यामि। अतः अहमेव वनराजपदप्राप्तये योग्यः।

4. अधोलिखितश्लोकस्य हिन्दीभाषया सप्रसङ्गसरलार्थं लिखत - 4×1=4

गुणी गुणं वेत्ति न वेत्ति निर्गुणो,
बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः,
करी च सिंहस्य बलं न मूषकः॥

**अथवा**

एक एव खगो मानी वने वसति चातकः।
पिपासितो वा म्रियते याचते वा पुरन्दरम्॥

5. अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लिखत - 2×2=4

(क) विचित्रा दैवगतिः।

(ख) अहो! हृदयग्राही स्पर्शः।

(ग) अशान्तानि खलु तान्येव महाविनाशम् उपस्थापयन्ति।

(घ) पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा।

**अथवा**

अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः उचितपदानि चित्वा पूरयत - 4×1=4

एकेन राजहंसेन या शोभा सरसो भवेत्।
न सा बकसहस्रेण परितस्तीरवासिना॥

**अन्वयः :-**

एकेन (i) ........... सरसः या (ii) ............. भवेत्। (iii) .............. तीरवासिना (iv) .............. सा न।

**मञ्जूषा**

| |
|---|
| बकसहस्रेण, राजहंसेन, परितः, शोभा |

6. अधः प्रदत्तं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - 3×1=3

(केवलं प्रश्नत्रयम्)

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत्। सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात।

**प्रश्नाः :-**

(क) कृषकः बलीवर्दाभ्यां किम् कुर्वन्नासीत् ?

(ख) जवेन गन्तुम् अशक्तः कः आसीत् ?

(ग) कृषकः कं तोदनेन नुद्यमानः अवर्तत् ?

(घ) 'कश्चित्' अस्मिन् पदे संधिविच्छेदं कुरुत ।

7. निम्नलिखितश्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन पूर्णवाक्येन लिखत - 2×1=2

(केवलं प्रश्नद्वयम्)

रे रे चातक! सावधानमनसा मित्र क्षणं श्रूयता-
मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः॥

**प्रश्नाः :-**

(क) गगने के सन्ति ?

(ख) अम्भोदाः कैः वसुधाम् आर्द्रयन्ति ?

(ग) चातकः कथं श्रूयताम् ?

8. रेखाङ्कितपदानि आधृत्य कोष्ठकात् चित्वा प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नत्रयम्) 3×1=3

(क) पुत्रं द्रष्टुं सः प्रस्थितः। (कम् / काम्)

(ख) चौरस्य पादध्वनिना अतिथिः प्रबुद्धः। (कदा / कस्य)

(ग) न्यायाधीशः बंकिमचन्द्रः आसीत्। (कः / कम्)

(घ) सः भारवेदनया क्रन्दति स्म। (कम् / कया)

9. प्रश्नपत्रे लिखितश्लोकान् विहाय **'शेमुषी भाग-2'** पुस्तकाद् एकं श्लोकं संस्कृतभाषया लिखत। 1x4=4

## खण्डः – 'घ'

## अनुप्रयुक्त-व्याकरणम्

10. (क) अयादिसन्धेः अथवा यण्-सन्धेः परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ख) द्विगुसमासस्य अथवा कर्मधारयसमासस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

(ग) कर्ताकारकस्य अथवा कर्मकारकस्य परिभाषां हिन्दीभाषया उदाहरणञ्च संस्कृतभाषया लिखत। 1×2=2

11. यथानिर्दिष्टं शब्दरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) 'राम' शब्दस्य प्रथमा-बहुवचने।

(ii) 'लता' शब्दस्य सप्तमी-बहुवचने।

(iii) 'रवि' शब्दस्य तृतीया-एकवचने।

(iv) 'किम्' (पु.) शब्दस्य चतुर्थी-एकवचने।

(v) 'बालक' शब्दस्य षष्ठी-बहुवचने।

(vi) 'अस्मद्' शब्दस्य प्रथमा-एकवचने।

12. यथानिर्दिष्टं धातुरूपाणि लिखत - (केवलं प्रश्नचतुष्टयम्) 4×1=4

(i) 'गम्' (गच्छ्) धातोः लट्लकारस्य, म.पु. बहुवचने।

(ii) 'पठ्' धातोः लृट्लकारस्य, म.पु. एकवचने।

(iii) 'दृश्' (पश्य) धातोः लोट्लकारस्य, उ.पु. एकवचने।

(iv) अस् धातोः लट्लकारस्य, प्र.पु. द्विवचने।

(v) 'पा' धातोः लृट्लकारस्य, उ.पु. एकवचने।

(vi) 'पठ्' धातोः लृट्लकारस्य, प्र.पु. एकवचने।

13. प्रदत्तोपपदविभक्तिवाक्येषु उचितविभक्तिं कोष्ठकात् चित्वा लिखत। (केवलं प्रश्नत्रयम्) 3×1=3

| | |
|---|---|
| (i) ................ नमः। | (देवेन / देवाय) |
| (ii) राजा ............. धनं ददाति। | (ब्राह्मणम् / ब्रह्मणाय) |
| (iii) ........... प्रति दयां कुरु। | (दीनम् / दीनेन) |
| (iv) मोहनः ........... खञ्जः अस्ति। | (पादेन / पादाय) |
| (v) मीनः ........... पृथक् न तिष्ठति। | (जलेन / जलाय) |

14. अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत। (केवलं प्रश्नद्वयम्) 2×1=2

| | |
|---|---|
| (i) इदानीम् वायुमण्डलम् ............ दूषितम् अस्ति। | (भृशम् / यत्र) |
| (ii) ............. रविवासरः आसीत्। | (श्वः / ह्यः) |
| (iii) .............. भोजो नाम राजा आसीत्। | (सदा / एकदा) |

15. निम्नक्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत। (केवलं प्रश्नद्वयम्) 2×1=2

(i) सम्मुखम् (ii) अपमानम् (iii) निर्दोषः

## खण्डः – 'ङ'

## पाठाधारिताः बहुविकल्पीयाः प्रश्नाः

16. अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्तवैकल्पिकचतुर्भ्यः उत्तरेभ्यः एकं शुद्धम् उत्तरं चित्वा लिखत - 17×1=17

(क) 'पदातिः+ एव' अत्र किं सन्धियुक्तपदम् ?

(i) पदातिएव
(ii) पदातेरिव
(iii) पदातिरेव
(iv) पदातरिव

(ख) 'प्रकृतिरेव' इत्यस्मिन् पदे कः सन्धिविच्छेदः ?

(i) प्राकृति + एव
(ii) प्रकृतिः+एव
(iii) प्रकृति+रेव
(iv) प्र+कृति

(ग) 'महाराष्ट्रे' इत्यस्य पदस्य विग्रहपदं किम् ?

(i) महत् च तत् राष्ट्रं तस्मिन्
(ii) महान् राष्ट्रः
(iii) महान राष्ट्र
(iv) महान च सः राष्ट्रम्

(घ) 'पञ्चवटी' इत्यस्मिन् पदे कः समासः ?

(i) द्वन्द्वः
(ii) बहुव्रीहिः
(iii) तत्पुरुषः
(iv) द्विगुः

(ङ) 'सार्थकम्' इत्यस्य पदस्य विलोमशब्दः किम् ?

(i) निर्धनम्
(ii) निर्बलः
(iii) निर्लज्जः
(iv) निरर्थकम्

(च) 'सम्पत्तौ' इत्यस्य पदस्य विलोमपदम् ?

(i) विरतौ
(ii) विपत्तौ
(iii) विगतौ
(iv) विसतौ

(छ) 'अश्वः' इत्यस्य पदस्य पर्यायपदं किम् ?

(i) पशवः
(ii) तुरगः
(iii) गावः
(iv) कपोतः

(ज) ‘वृक्षः’ इत्यस्य पदस्य पर्यायपदं किम् ?

(i) द्रुमः (ii) पादपः

(iii) लता (iv) रुहः

(झ) ‘त्यज् + क्त्वा’ इत्यस्मिन् संयोगे किं रूपम् ?

(i) त्यजित्वा (ii) त्यज्य

(iii) त्यक्त्वा (iv) त्याज्य

(ञ) ‘धैर्यवान्’ इत्यस्मिन् पदे कः प्रत्ययः ?

(i) मतुप् (ii) क्त

(iii) क्त्वा (iv) तुमुन्

(ट) ‘नवतिः’ इत्यस्मिन् पदे का संख्या?

(i) 19 (ii) 29

(iii) 90 (iv) 99

(ठ) '27' इत्यस्य पदस्य किं संख्यावाचीपदम्?

(i) पञ्चाशत् (ii) सप्तदशः

(iii) सप्तविंशतिः (iv) सप्तादश

(ड) ‘महत् विद्याधनम्’ अत्र किं विशेष्यपदम् ?

(i) महत् (ii) विद्याधनम्

(iii) विद्या (iv) धनम्

(ढ) ‘सर्वैः उपायैः’ अत्र किं विशेषणपदम् ?

(i) सर्वै (ii) सर्वैः

(iii) उपायैः (iv) सर्वउपायैः


(ण) 'पञ्चवटी' इत्यस्मिन् पदे कः समासः ?

(i) द्वन्द्वः (ii) अव्ययीभावः

(iii) तत्पुरुषः (iv) द्विगुः

(त) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत -

रामः प्रातः ........... वादने उत्तिष्ठति।




(i) पञ्च (ii) सपादपञ्च

(iii) सप्त (iv) सार्धपञ्च

(थ) मयंकः प्रातः ........... वादने भ्रमणाय गच्छति।




(i) चतुर्वादने (ii) सपादचतुर्वादने

(iii) सार्धचतुर्वादने (iv) पादोनचतुर्वादने